अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ......................

**Paper Code**
**BV-404**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : चतुर्थम्)**
**चतुर्थपत्रम् – वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम् :** इदं प्रश्नपत्रम् सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

## (दर्शनम्) 25 अङ्काः

**प्रश्नः1– द्वयोः सूत्रयोर् अग्रे पञ्च सूत्राणि लेखनीयानि।** **(5X2=10)**

(क) स्थूलात् पञ्चतन्मात्रस्य।। (ख) वामदेवादिर्मुक्तो नाद्वैतम्।।
(ग) नासदुत्पादो नृशृङ्गवत्।। (घ) छिन्नहस्तवद् वा।।

**प्रश्नः2– पञ्चानां सूत्राणाम् अर्थाः बोधनीयाः।** **(5X1=05)**

(क) कृतनियमलङ्घनादानर्थक्यं लोकवत्। (ख) शरीरादिव्यतिरिक्तः पुमान्।
(ग) त्रिगुणाचेतनत्वादि द्वयोः । (घ) नियतकारणत्तदुच्छित्तिर्ध्वान्तवत्।
(ङ) अकर्त्तुरपि फलोपभोगोऽन्नाद्यवत्। (च) सौक्ष्म्यात्तदनुपलब्धिः।

**प्रश्नः3– द्वयोः विषयात्मकप्रश्नयोः समाधानं करणीयम् –** **(2X5=10)**

(क) मोक्षसाधनोपदेशविधिः कस्य न क्रियते? किमर्थम्? सूत्रैः सह वर्णयन्तु।
(ख) प्रमालक्षणं प्रमाणलक्षणं च तथा कानि प्रमाणानि सन्ति? सूत्रैः सह वर्णयन्तु।
(ग) पञ्चविंशतिर्गणं सूत्रैः सह वर्णयन्तु।

## (उपनिषत्) 20 अङ्काः

**प्रश्नः4– मुण्डकोपनिषत्सु स्मृताःकेचन पञ्च मन्त्राः लेखनीयाः।** **(5X2=10)**

**प्रश्नः5– चतुर्णां विषयात्मकप्रश्नानां समाधानं कर्तव्यम्।** **(4X2.5=10)**

(क) विश्वसम्भवनं कथं भवति ऊर्णनाभ्युदाहरणेन मन्त्रेण वर्णयतु।
(ख) विरक्तीभूय ब्राह्मणः किं कुर्यात्? मन्त्रेण वर्णयन्तु।
(ग) आत्मानं कोऽपि प्रकाशयति न वा? मन्त्रेण वर्णयन्तु।
(घ) अध्यात्मपथि सत्यस्य महिमा मन्त्रेण वर्णयन्तु।
(ङ) अध्यात्मा कस्य कृते स्वरूपं प्रकटयति न वा प्रकटयति।
(च) ब्रह्मवेधनस्य प्रक्रियां मन्त्रेण सह वर्णयन्तु।

## (मनुस्मृतिचर्पटमञ्जयौ) 25 अङ्काः

**प्रश्नः6– केचन दश स्मृताश्लोकाः लेखनीयाः।** (10X01=10)

**प्रश्नः7– पञ्चानां श्लोकानाम् अर्थो लेखनीयः।** (5X03=15)

(क) यत्सर्वेणेच्छति ज्ञातुं यन्न लज्जति चाचरन्।
येन तुष्यति चात्माऽस्य तत्सत्त्वगुणलक्षणम्॥

(ख) इन्द्रियाणां प्रसंगेन धर्मस्यासेवनेन च।
पापान् संयाति संसारान् अविद्वांसो नराधमाः॥

(ग) तपोविद्या च विप्रस्य निःश्रेयसकरं परम्।
तपसा किल्विषं हन्ति विद्ययाऽमृतमश्नुते।

(घ) कस्त्वं कोऽहं कुत आयातः, का मे जननी को मे तातः।
इति परिभावय सर्वमसारं, विश्वं त्यक्त्वा स्वप्नविचारम्॥

(ङ) यावज्जीवो निवसति देहे, तावत्कुशलं पृच्छति गेहे।
गतवति वायौ देहापाये, भार्या बिभ्यति तस्मिन् काये॥

(च) सुखतः क्रियते भोगारामः, पश्चाद्धन्त शरीरे रोगः।
यद्यपि लोके मरणं शरणं, तदपि न मुञ्चति पापाचरणम्॥

---------------X---------------